छत्रदण्डवदुन्नेयः काष्ठजाया विनिश्चयः । कनकं रजतं ताम्रं पित्तलं सीसकं तथा । लौहं सर्वञ्च सर्वाङ्गमादित्यादिदशाभुवाम् । राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी । खङ्गाणां महिषाणाञ्च शृङ्गजाता प्रसाधनी । गजदन्तसमद्भूता राज्ञामेवोपयुज्यते । अत्रापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत्" ।

४५०४ पृष्ठस्थप्राकृतशब्दस्य परिशिष्टम्

प्राकृतभाषा च अष्टादशभाषामध्ये भाषाभेदः । तास्ता द्वादश सा॰द॰ उक्ता यथा "पुरुषाणामनीचानां संस्कृता१ स्यात् कृतात्मनाम् । शौरसेनी२ प्रयोक्तव्या तादृशीनाञ्च योषिताम् । आसामेव तु गाथासु महाराष्ट्रीं३ प्रयोजयेत् । अत्रोक्ता मागधी४ भाषा राजान्तःपुरचारिणाम् । चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी५ । प्राच्या६ विदूषकादीनां धूर्त्तानां स्यादवन्तिका७ । योधनागरिकादीनां दाक्षिणात्या८ हि दीव्यताम् । शकाराणां शकादीनां शाकारीं९ सम्प्रयोजयेत् । बाह्लीकभाषा१० दिव्यानां द्राविड़ी११ द्रविडादिषु । आभीरेषु तथाऽऽभीरी१२ चाण्डाली१३ पुक्कसादिषु । आभीरी शावरी१४ चापि काष्ठपत्रोपजीविषु । तथैवाङ्गारकारादौ पैशाची१५ स्यात् पिशाचवाक् । चेटीनामप्यनीचानामपि स्यात् शौरसेनिका१६ । बालानां षण्डकानाञ्च नीचग्रहविचारिणाम् । उन्मत्तानामातुराणां सैव स्यात् संस्कृता क्वचित् । ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपप्लुतस्य च । भिक्षुबन्धधरादीनां प्राकृतं१७ सम्प्रयोजयेत् । संस्कृतं सम्प्रयोक्तव्यं लिङ्गिनीषूत्तमासु च । देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् । यद्देशं नीचपात्रन्तु तद्देशं तस्य भाषितम् १८ । कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः । योषित्सखीबालवेश्याकितवाप्सरसां तथा । वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा" । तत्तद्भाषालक्षणानि भाषार्णवे दृश्यानि ।

४५२२पृष्ठस्य प्रातर्शब्दस्य परिशिष्टम्

"प्रहरोऽर्द्धसंयुक्तः प्रातरित्यभिधीयते" नि॰सि॰ गार्ग्योक्ते १अहिस्नाद्याङ्के २सार्द्धप्रहरात्मके काले ।

# फ

फकारः पञ्चमवर्गस्य द्वितीयवर्णः स्पर्शवर्णेषु द्वाविंशतितमः । अस्योच्चारणस्य स्थानमोष्ठौ तस्योच्चारणे आभ्यन्तरः प्रयत्नः जिह्वाग्रस्य ओष्ठाभ्यां सह स्पर्शः अतएवास्य स्पर्शवर्णता । बाह्याः प्रयत्नाः विवारश्वासाघोषाः महाप्राणाश्च । अस्मिन् परे विसर्गस्य स्थाने उपाध्मानीयः ‿ । तन्त्रे वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्दनः । जया पादशिखा रौद्री फेत्कारः शाखिनी प्रियः । दला विहङ्गमः कण्ठः कुञ्जिनी प्रियपावकौ । प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी । फुत्कारो यामिनी झञ्झापवनो मोहवर्द्धनः । निष्फलवागहङ्कारः प्रयाणो ग्रामणी फलम्" । तदीयदेवताध्यानं यथा "प्रलयाम्बुदवर्णाभां ललज्जिह्वां चतुर्भुजाम् । भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् । एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य ध्येयस्वरूपं यथा "फकारं शृणु चार्वङ्गि ! रक्तविद्युल्लतोपमम् । चतुर्वर्गप्रदं वर्णं पञ्चदेवमयं सदा । पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् । आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुतन्त्रम् । मातृकान्यासेऽस्य वामपार्श्वे न्यासः । काव्यादावस्य प्रथमविन्यासफलं पकारशब्दे उक्तं दृश्यम् ।

फ न॰ फक्क–ड । १रूक्षकथने २निष्फलवाक्ये ३फुत्कारे च मेदि॰ ४झञ्झावाते ५वर्द्धके ६जृम्भाविष्कारे ७फलभागे च पु॰ विश्वः ।

फकार पु॰ फ+स्वरूपे कार । फस्वरूपे वर्णे ।

फक्क असदाचारे मन्दगतौ च भ्वा॰पर॰सक॰ सेट् । फक्कति अफक्कीत् पफक्क ।

फक्किका स्त्री फक्क–धातुनिर्देशे भावे ण्वुल्–टाप् अतइत्त्वम् । १असद्व्यवहारे (फाँकि) २तत्त्वनिर्णयार्थं पूर्वपक्षे च "फणिभाषितभाष्यफक्किका" इति नैषधम् ।

फगुल पु॰ गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

फञ्जिका स्त्री भञ्जति रोगान् भनृज–मर्दने ण्वुल् पृषो॰ । (वामनहाटि) १वृक्षे अमरः । २देवताडे ३दूरालभायां शब्दरत्ना॰ ।

फञ्जिपत्रिका स्त्री भनृज–णिनि पृषो॰ फञ्जि रोगमर्दिपत्रं यस्याः । आखुकर्णाम् (उन्दुरकानि) रत्नमा॰ ।